स्याद्वादारितिथिया मम यतः श्रेयोऽचिराच्छाश्वतम् ॥२४॥

इति युगप्रधानावतारबृहत्तपागच्छाधिराजश्रीदेवसुन्दरसूरिश्रीज्ञानसागर-
सूरिश्रीसोमसुन्दरसूरिशिष्यैः श्रीमुनिसुन्दरसूरिभिर्विरचिते जयश्रीके
श्रीजिनस्तोत्ररत्नकोशे प्रथमप्रस्तावे नागह्रदभूषण-
श्रीपार्श्वजिनस्तोत्रं द्वादशम् ।

जिनेश ! वाचो लघु नाशयन्ति ते ॥ १३ ॥
भ्रमन्ति ते वीर ! विभो ! कथं गिरः
सुधारसेनोपमितिं मनीषिणः ? ।
भवातपार्ते मरणं जरां च या
हरन्ति येनोऽविषयीकृता अपि ॥ १४ ॥
स कोऽपि दीपो भवताऽऽगमाह्वया-
न्वितोऽपि नैकान्तमतावलम्बनः ।
पतङ्गवद्भिरिव लङ्घितुं हि यः
परैरहो ! आशङ्कितो न कैरपि ॥ १५ ॥
तवागमेन्दुद्दिततोमतिः सतां
करोति सं कश्चन शीतिमोदयम् ।
सुरासुराऽवारितमानमत्सराः
कषायदावा अपि यं हरन्ति न ॥ १६ ॥
गोमद्भाजा भवता महाहवो
कृपाधिपामानि लकोऽपि भारते ।
एकोऽपि यो लङ्घयितुं बहूनलं
संसारकान्तारमनन्तमद्विनः ॥ १७ ॥
विभो ! नवाऽहो ! तव वीक्ष्णेह
गणाधिपानां हृदयं निलीनम् ।
अगाध सन्देहमहाब्धिमग्नं
सुधाजिवार्णेऽपि रूपहीनम् ॥ १८ ॥
तवागमाम्भोजमवाप्तिचिन्तकः
करोति मे वीर ! भयं भवोदधिः ।
तनोति मोहः कुमतिं तथापि मां
यथा भजे वाञ्छितदां न तेऽङ्घ्रिकम् ॥ १९ ॥
इदं विदुः शाक्य नाथ ! येन ये
विचारकैर्हि बहुधा कदाग्रहैः ।

॥ अर्हम् ॥

जयश्रीः संश्रयेद् यस्य स्तोतॄन् द्वेषारिनिर्जयात् ।
तं श्रीपार्श्वप्रभुं स्तौमि फलवर्द्धिविभूषणम् ॥ १ ॥

आरोग्या-ऽऽयु-र्विभव-विभुता-भोग-सद्बुद्धि-रूप-
श्रेयःश्रेणि-प्रणय-विनयाद्याढ्यपुत्रादिलाभाः ।
यत्पूजा स्वर्गततिजनुषां वर्णिका स्यात्फलाना-
मग्राप्याप्या स भवतु सतामिष्टकृत्पार्श्वदेवः ॥ २ ॥

साम्राज्यश्रीर्गतरिपुभया चक्रिणां वा समृद्धि-
र्देवेन्द्रादित्रिदशपदवी साऽपि चार्हन्त्यलक्ष्मीः ।
सम्पन्मुक्तेरपि च सुलभा ध्यायतो यत्पदाब्जं
स श्रीपार्श्वः सृजतु हृदये मे निवासं सदाऽपि ॥ ३ ॥

दृष्टेऽत्रापि त्रिभुवनविभुस्त्वं पुमर्थत्रयाप्तिं
प्रेत्य श्रेयं हरसि कृतिनां सर्वसंसारदुःखम् ।
तेन त्राणं सकलजगतां त्वां त्रियोगीविशुद्ध्या
क्लेशव्यूहव्यपगमकृते नाथमेकं प्रपद्ये ॥ ४ ॥

भूम्यन्तर्गतगर्भदेवकुलिकासंस्थां स्रवन्तीं पयो
दृष्ट्वा त्वां सुरभिं चमत्कृतमना ज्ञात्वा सुराऽऽदेशतः ।
श्राद्धो यत्प्रतिमां फणालिरुचिरां प्राचीकटद्धान्यलः
स श्रीमान् फणवर्द्धिभूषणमणिः पार्श्वप्रभुः पातु माम् ॥५॥

देवादेशात्तव जिनपते ! कार्यमाणेऽत्र चैत्ये
श्राद्धाग्रण्या शिवकरपुत्रा तेन चाल्पर्द्धिनाऽपि ।
निष्पन्नेऽभ्यादिमवरमहामण्डपेऽथाग्रनस्त-
न्निष्कर्षे यावद् द्रविणविरहाज्जग्मतुस्तौ विषादम् ॥६॥

तावत्स्वप्ने जिन ! तव पुरः स्वस्तिकं रूपकाणां
वीक्ष्यादायाऽऽस्वरवगिरा प्रत्यहं चैत्यपक्षात् ।
द्रव्यादेतौ सकलमतुलं मण्डपः पञ्चभिस्तं
प्रासादं ते कतिपयदिनैः कारयामासतुर्द्राक् ॥७॥

परामवो यः किल सेवके रिपो-
रयं धुनीते विभुतागुणं विभोः ॥ २० ॥
जडा विषीदन्ति सुरान्तराऽर्चनैः
समीहया भूपतिसम्पदामपि ।
मुनेरनन्तो महिमा स कोऽपि ते-
ऽवहीलना तासु ययापि ते फले ॥२१॥
तवागमागाधसुधासरोवरे
निलीयतां मेऽङ्ग ! तथा मनोझषः ।
यथा भवापायदवानलोदितं
न विन्दते तापभरं मनागपि ॥ २२ ॥
भवन्तु नूनं सुकृतानि तानि मे
सदा मनो हे भुवनैकबान्धव ! ।
इदं निलीनं तव पादपङ्कजे
दृढानुबन्धं चलतां जहाति यैः ॥ १३ ॥
समीहमानः शिवमेव कोविदो
यतेत संसारसुखार्णवे न तु ।
परैरनेनैव च वञ्चिता जना
मतो भवानेव गतिः स देहिनः ॥ २४ ॥
न दातुमीशा मरुतां महीरुहा
न या घटा नो मणयो न धेनवः ।
अनन्तसातोदयिनीं ददाति ता-
मधीश ! पुंसां कृपया तवानतिः ॥ २५ ॥
अपारसंसारविकारभेदिने
सदा परानन्दचिदेकयोगिने ।
समीहिताऽशेषशुभौघदायिने
नमो नमो वीरजिनाय तायिने ॥ २६ ॥
मङ्गलानि विमृशन्ति समन्ता-

[illegible]
[illegible] ।
[illegible]
[illegible] ॥८॥
([illegible])

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ९ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥१०॥
[illegible] वा
[illegible] ।
[illegible]
[illegible] ॥११॥
[illegible] च
[illegible] ।
[illegible]
[illegible] ॥१२॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥१३॥
[illegible]
[illegible] ।

दानमन्ति रिपवो जिन ! पुंसाम् ।
सम्पदः सममिहापि सुरौघैः
सम्भवन्ति भवतो नुवतो मे ॥ २७ ॥
एवं वीर ! जिनामुनाऽपि मयका मुग्धस्तवेन स्तुतो
दृब्धेनेश सुकेवलाक्षरपदैर्भक्त्या कृपावारिधे ! ।
आरोग्योत्तमबोधिबीजविभवं दत्त्वा प्रसद्याशु मे
देयान्निर्मलकेवलाक्षरपदं मोक्षज्ञयश्रीभरम् ॥ २८ ॥
एवं वीरजिनं जगत्त्रयपतिं श्रेयोविलासालयं
दाक्षाश्रीमुनिसुन्दरस्तवगणैर्नूनक्रमं यः स्तुते ।
सर्वाभीष्टसुखौघपर्वविरतं स्फूर्जत्प्रमोदाऽद्वयो
मोहद्वेषि जयश्रिया स लभते श्रेयांऽचिराच्छाश्वतम् ॥२९॥

इति युगप्रधानावतारबृहत्तपागच्छाधिराजश्रीदेवसुन्दरसूरिश्रीज्ञानसागर-सूरिश्रीसोमसुन्दरसूरिशिष्यैः श्रीमुनिसुन्दरसूरिभिर्विरचिते जयश्र्यङ्कं केवलाक्षरपदं स्तोत्ररत्नं पञ्चदशम् ।

॥ अर्हम् ॥

जयश्रीनिलयं यस्य पदाम्भोजं भजन् भवी ।
भवतेऽभीप्सितं श्रेयः श्रीवीरं तं स्तुवे विभुम् ॥ १ ॥
न शब्दव्युत्पत्तिर्मम चतुरता नापि कविता
गुणौ नार्थोत्पत्तिः स्फुरति पटुता नो भणितिषु ।
प्रयत्नः स्तोतुं त्वां तदपि यदयं हेतुरिह मे
विभोऽनन्योपाये शिवसुखफले गाढरुचिता ॥ २ ॥
न मे पात्रं मैत्र्या न वशकरणा नोद्यचरणा
न शीलाढ्या नो वा दमितमनसो नोप्रशमसः ।
दयालैरैस्त्वय्यतुलकरुणायेव जगदे
शिवपर्यापायोऽर्हन् ! मुनिभिरिति ते संस्तुतिरियम् ॥ ३ ॥
नयैरेकैकांशग्रहणनिपुणैर्नाथ ! न गुणा-

स्तवाऽनन्ताः शक्याः स्तवयितुमनन्तैरपि गुणैः ।
प्रमात्वात्त्वयं नतान् जिन ! सममनन्तानभिदधम्
स्तुवन्ति स्तोतारस्तव मतविदो वादिन इव ॥ ४ ॥

पुनर्जन्माभावोऽखिलजनहितैकार्थकरणं
न वैरूप्यं कार्ये क्वचिदपि न चौत्सुक्यमपि यत् ।
कदाऽप्यस्वास्थ्यं नेत्यनुपमतयैवाभवपरान्
स्वरूपं ते देवानधरयति मुग्धाशयमुषः ॥ ५ ॥

महानन्दप्राप्तौ न भवति रतिः संसृतिसुखे
गतेऽत्यन्ताभावं वपुषि खलु जन्माऽस्ति न पुनः ।
समग्रैश्वर्याप्तौ प्रभवति न भिन्नेतरमति-
र्बुधैरन्यैरन्ये कथमनुसृतास्त्वस्थिरधिया ॥ ६ ॥

विमुक्तो रागाद्यैः प्रथयति फलं नो तदुचितं
विनाऽर्थी नाहं न च तदुदये निर्वृतिसुखम् ।
स्वयं नाप्तासम्यग्भवति परेभ्यो वितरितुं
त्वदन्यं सेवन्ते कथमिव परे तेन कुधियः ? ॥ ७ ॥

अमेयास्ते बाणा भुवनजयिनः शम्बररिपोः
कथाऽप्यास्ते कोपा हरनर-सुराधीश्वरमदाः ।
अयं मोहस्तेषां प्रसरति भवन्ने स्तुतिपदं
विभो ! तावत्तावन्न तव चरितं सीदति हृद् ॥ ८ ॥

उदासीनस्येशा प्रभवति जिहासाऽपि च यतः
प्रमाणं तद् ज्ञानं व्यपगतविकारं मम परैः ।
उपायादि ज्ञानं भवति न तथा कैवल नु च-
स्फुरत्येतत् स्वमत्यपगमपिति नास्माकु नयति ॥ ९ ॥

यदन्यो मायायामपि निविशते वस्तु सकलं
त्वयाऽर्हन् ! ये मन्त्रा निगदितविदूषा गत महिमाः ।
न वादीन्द्राः केचिद्वपुरि रहनकौतुकगिरो-

१ अमोघा इति पाठान्तरम् ।

शीर्षे यस्य फणाः प्रभामणिकरोन्मिश्राः प्रसर्पन्ति खे ।
कर्मैधांसि जगत्त्रयस्य दहनः सेवाऽऽगतप्राणिनां
धूम्यायास्तुलयन्ति या हुतवहज्वालोज्ज्वलायाः श्रियम् ॥२१॥
यत्ते कल्पलताः स्वमूर्तिनिभया शोचन्मणीपल्लवाः
सप्ताहीन्द्रफणाल्स्यास्त्रिजगतीभीतीः क्षिपन् सप्तधा ।
सप्तद्वीपसमेधिपृथ्वीन्द्विनिकराभीष्टार्थदानाय यः
संसाराम्बुधिसेतवेऽस्तु त्रिभवे पार्श्वाय तस्मै नमः ॥ २२ ॥
शब्दातीतमनन्तसद्गुणमयं स्याद्वादिमाद्विध्वनो
यत्ते तत्त्वमनक्षरपदकविषयं देव ! प्रतिष्ठाचणम् ।
यत्तद्विमलपक्षिह स्तुतिनिधिया न त्वां कथं वाचकी
पूर्वोक्तानुगमात्तयाऽप्ययमिति स्वामिन् ! फलार्थादिति ॥ २३ ॥
स्तुत्वेति पार्श्व ! फलवर्द्धिविभूषणस्य
पादद्वयं प्रणतमन्मुनिसुन्दरं ते ।
याचे भवारिविजयश्रियमीश ! यस्यां
त्वां नित्यविस्फुरदनन्तसुखोदयात्मा ॥ २४ ॥

इति युगप्रधानावतारबृहत्तपागच्छाधिराजश्रीदेवसुन्दरसूरिश्रीज्ञानसागर-सूरिश्रीसोमसुन्दरसूरिशिष्यैः श्रीमुनिसुन्दरसूरिभिर्विरचिते जयश्रियाङ्के श्रीजिनस्तोत्ररत्नकोशे प्रथमप्रस्तावे श्रीफलवर्द्धिमण्डनश्रीपार्श्व-नाथस्तोत्ररत्नं त्रयोदशम् ।

॥ अर्हम् ॥

जयश्रीविलासालयं सर्वदेवा-
सुराधीशसंसेव्यपादारविन्दम् ।
जगन्नायकं दायकं प्रौढलक्ष्म्याः
स्तुवे श्रीजिनं वर्द्धमानाभिधानम् ॥ १ ॥

---

१ समागतेति च पाठः ।

प्रभो ! मङ्गलं शाश्वतं संस्तवस्ते
समाकर्षणं सम्पदां सर्वतोऽर्हन् ! ।
धृतिः कान्ति-कीर्ती महत्त्वं प्रतिष्ठा
सुखं चेति तस्मिन् प्रयत्नं विदध्याम् ॥ २॥
युगेऽस्मिन्निशीथेऽपि मोहापनोदात्
प्रकाशाय मोक्षाध्वनोऽद्दीदिपद्यः ।
स्थिरं विश्वविद्योतिसिद्धान्तदीपं
नमो वर्द्धमानाय तस्मै जिनाय ॥ ३ ॥
अभीष्टं त्वदीयागमार्येक्षणाना-
मुपेयं परानन्दशर्मैव नेतः! ।
उपायस्तु तस्य त्वदाज्ञैव सम्यक्
प्रदेहीति तामेव शुद्धां प्रभोऽर्हन् ! ॥ ४ ॥
ध्यायन्ति ये नाथ ! पदद्वयं ते
पदद्वयं ते सुधियो लभन्ते ।
महोदयं वा सुमनोमनो वा
सदैव दाता हि पदं ददाति ॥ ५ ॥
जगत्त्रयत्राणगणे प्रभौ मे
त्वयि प्रपन्ने न भयं कुतोऽपि ।
विश्वप्रकाशप्रवणे रवौ य-
त्र सेव्यमाने तमसोऽवकाशः ॥ ६ ॥

अतिशीतिसमृद्धिरद्भुता तव संविद्विभवश्च सर्वगः ।
भुवनोपकृतौ प्रगल्भसे कृतकृत्यः स्वयमीश ! तन्नुवम् ॥ ७ ॥
न च रुष्यसि नापि तुष्यसि प्रभुता काऽपि तथाऽपि तेऽद्भुता ।
अपि सर्वगुरावुरीश्वरा न पदाज्ञां तव लङ्घयन्त्यहो ! ॥ ८ ॥
त्रिजगत्प्रिमतन्मनास्यहो युगपत्त्वं पदयन्यतः सुरम् ।
अतिमत्प्रिभृतेऽपि तोषितैर्ददितुं तच्च परैः प्रगल्भ्यते ॥ ९ ॥
यदनन्तसुखाधिभूरू परं भवतो प्राप्त न तत्र शासिनः ।

उदीर्णमोहमनिरोधकेक्षणाः
समीक्षितुं तन् प्रभवः कथं परे ? ॥ १७ ॥
गिरा मयचापि भवन्तमीश्वरं
भवन्ति केचित्कुधियो भवास्पदाः ।
जगज्जिगीषाऽस्तुरविक्रमः परं
न तीर्थिकैस्तुष्यति मोहवैरयम् ॥ १८ ॥
त्वां मत्यजे विमतिपन्नचेतसः
कथं न शोच्या भगवन् ! कुतीर्थिकाः ? ।
मतास्तथैवामतिपन्नका अपि
ध्रुवं मयचापि विराधकाश्च यत् ॥ १९ ॥
त्वयि प्रपन्नेऽपि विभो किमङ्ग ! मे
सृजन्ति रागादिरिपुव्रजा व्यथाम् ? ।
अहो ! विशुद्धिर्मनसः सकर्मणां
सुदुर्लभाऽमी प्रभवन्ति यां विना ॥ २० ॥
कुज्ञानदर्शनकपाटयुगेऽभविष्यद्
दुर्लक्षता तव विभो ! यदि नार्गलेयम् ।
मोहोघदुर्गमतिगत्य सुदर्शनाक्षि-
द्वारेण के शिवपुरं न तदाऽध्ययास्यन् ?॥ २१ ॥
निर्दोषे ते भुवनविदितेऽप्यद्वितीये चरित्रे
मुग्धश्चर्ह्येऽपि शिवगमी तीर्थिकैः सङ्गतोऽङ्गी ।
छद्मः काचैरिव वरमणिर्यां विनेष्टार्थभागो
सामग्रीं तामभवफलदां देहि यत्स्यां कृतार्थः ॥२२॥
दानं चारु न मे न शीलमतुलं नोग्रं तपो नो स्थिरो
भावो नाऽतिदया क्रियासु न रुचिर्नान्योऽपि कश्चिद् गुणः।
भाति ब्रह्म तथाऽप्यतः स्तवनतः सम्बन्धमात्रेण ते
तुच्छादप्यभवैवमस्मि सुहितश्चिन्ता तवैवाग्रतः ॥ २३ ॥
देवसुन्दर ! सुदैवमनन्तज्ञानसागर ! मयाऽपि नुतोऽर्हन् ! ।

यदीक्षितं क्वापि न चेक्ष्यतेऽपि तं-
भजन्ति न त्वामिति युक्तमीश ! ते ॥ ५ ॥
स्वजातिवात्सल्यवशादिवाङ्गिनः
सकर्म्मकैरेव मिलन्ति दैवतैः ।
अलक्ष्यरूपं त्रिजगद्विलक्षण-
स्थितिं भवन्तं ननु के श्रयन्तु तत् ? ॥ ६ ॥
स्वतन्त्रमुज्जासयता रिपूत्करा-
स्त्वया स्मराद्याश्चिरसेवका अपि ।
उपारतं त्वामिति विप्रयन्ति ते
जनं त्वदन्यांस्तु बहुं प्रयुञ्जते ॥ ७ ॥
त्वया निरास्यन्त चिरन्तसेवकाः
स्मरादयो हंसि च तत्पदान्यपि ।
भजन्ति तत्त्वां बहवो भियेव ना-
ङ्गिनोऽन्यथाचारवतः परान् श्रिताः ॥ ८ ॥
परेषु मोहाः मदादिभिः स्फुट-
स्तदन्विते ज्ञानमशेषगं न च ।
न तद्विना वस्तु यथायथं वद-
त्यतः परोक्तैः क्रियु वञ्च्यते जगत् ? ॥ ९ ॥
विभूय तेऽज्ञानमशेषवेदिन-
स्तपःक्रियाऽनुष्ठितयः परेषु याः ।
स्फुरन्ति मोहस्य विडम्बनाऽम्बुधे-
र्ध्रुवं विभो ! ता अपि काश्चिदूर्मयः ॥ १० ॥
भवो महिम्नां जिन ! कोऽपि वर्ण्यते
परेषु मोहस्फुरितेषु यो जडैः ।
निकृन्तनं केशनखरमीप्सयं
सतां कृपायै स्वरिवेह चोत्क्रमः ॥ ११ ॥

श्यामे च वाप्रेयजनिर्दशम्याम् ।
एकादशी पार्श्वतपःसदाऽर्के १२
जन्मेन्दुलक्ष्म्याऽऽप तपोऽस्य विश्वे १३ ॥ ५ ॥
मनौ १४ मति माघ च शीतलोऽथ
शुभ्रेऽभजत् मां विमलो रसे ६ ऽन्ते ।
शान्तिर्नवम्यामजितश्च जन्म ११
रवे १४ ऽभिनन्दश्च तिथौ १५ च धर्मः ॥ ६ ॥
माघेऽथ पद्मप्रभजिनोऽसिते रसे ६
च्युतो रवौ १२ जन्मतपश्च शीतले ।
विश्वे १३ शिवं श्रीवृषभोऽभजन्मनि
श्रेयानमावां च १५ जिनोऽप पक्षके ॥ ७ ॥
चुर्यरेऽभिनन्दनजनुर्वसुपूज्यसूनोः
शान्ते च धर्मविमलोऽजनत्तृतीया ।
अष्टौ मनं च विमलोऽजितजन्म सर्वे ८
नन्दे९ऽजितमहनामिनरे१०ऽरविनन्दनीया ॥ ८ ॥
वते १२ पद्मी शीतलिनः फाल्गुनेऽथ
श्यामे चतुर्थी ज्ञानमापः सुपार्श्वः ।
सिद्धि पार्श्वोऽसौ मति चेन्दुलक्ष्मा
नन्दे९ श्यामोश्चन्द्रनामनाः ॥ ९ ॥
आदौश ईशे ११ मानमाप मुर्वे १२
श्रेयान् अधि केवलिनां मुनेश्च ।
धर्म १३ तपःश्रेयसि वासुपूज्ये
अनुर्वनौ १४ नम्य तपः पुरौ १५ च ॥ १० ॥
सितेऽभासत्नेत्राश्व ऽहिपुष्पवावनाः
जिनाश्च मासमुखसवानाप ।
मनापणौ १२ सुखतामदानां
पुष्पच मल्लिजिनोऽप पेव ॥ ११ ॥

अथवा—

स्तुवन्ति येऽन्यमदादिविगुणं
देवाः प्रभुत्वं भगवन् ! परंपरि
कलापदाप्यात्मगतौ न यत्पदा
उपहसन्ति ह्यास्य यतिनेन तेन सः ॥ १२ ॥

विभो ! कुमार्गप्रतिच्छेदना यथा यथा
त्वं यतन्ते ननु ते शिवाप्तये ।
भवन्ति दूरेण जनास्तथा तथा
गुणागणाभ्योऽधिगतात् प्रमादिन ॥ १३ ॥

त्वदीश ! स्तवनपदानुरूपितं
[illegible] ।
[illegible]
[illegible] ? ॥ १४ ॥

त्वया [illegible] जिन ! [illegible]
[illegible] ।
[illegible]
[illegible] ॥ १५ ॥

[illegible] ! [illegible]
[illegible] ।
[illegible]
[illegible] ॥ १६ ॥

[illegible]
[illegible]
[illegible]
[illegible] ॥ १७ ॥

[illegible]
[illegible]

पार्श्वच्युतिज्ञानलभा चतुर्थ्यां
वाणे५ऽवतारः शशिलाञ्छनस्य ।
वसौ८युगादीशजनुश्चरित्रे
शुभ्रेऽथ कुन्थोरनले३ऽवबोधः ॥ ॥ १२
इषा५वनन्ताजितशम्भवेषु
सिद्धिर्निधौ९ऽसा सुमतेश्च रुद्रे ११ ।
बोधोऽस्य विश्वे १३ जननं च वीरे
पद्मप्रभौ ज्ञानकरौ च राका ॥ १३ ॥
राधेऽथ कृष्णे प्रतिपद्विमुक्त्यै
कुन्थोर्द्वितीयाऽजनि शीतलस्य ।
सिद्धिः शरे ५ प्रव्रजनं च कुन्थोः
श्रीशीतलस्यावतरश्च तर्के ६ ॥ १४ ॥
नमेः शिवं दिग्यु१०ग्भूदनन्तो
यक्षे१३मनौ१४गास्य चारित्रबोधौ ।
जनिश्च कुन्थोर्विशदेऽभिनन्दो
वेदे४च्युतोऽश्वे७ऽवततार धर्मः ॥ १५ ॥
फणभृत्य८भिनन्दनिर्वृतिः
सुमतेर्जन्म च तत्परोनिधौ९ ।
दिवि१०वीरमतौ रवौ१२ च्युति-
र्विमले विश्वनिधि१३च्युतोऽजितः ॥ १६ ॥
ज्येष्ठे तु कृष्णे च्युतये रसो६ऽभूत्
श्रेयांसनेतुर्मुनिजन्म नागे ८ ।
निधौ९च सिद्धो जनिनिर्वृती श्री-
शान्तेस्तु यक्षे१३भुवने१४व्रतोऽस्य ॥ १७ ॥
मिते शरे५ऽपवर्गिः नाम्नो
श्रीवासुपूज्यावतरः सुपार्श्वः ।
मासो रवौ१२ऽप्यदिने१३व्रतोऽस्या-

पादे श्रितो श्रीह्रषभरुत्पुनोऽन्त्यो ४ ॥ १८ ॥
इषे७ऽप्यवर्गो विमले निर्वो ९ श्री-
नेमेरतथस्या धवले तु पष्ठ्याम् ।
वीरस्त्पुनो दन्तिनि८नेमिपोषो
रवे१४विमुक्तो वसुपूज्यजन्मा ॥ १९ ॥
श्रावणे इयापत्तेऽष्टौ३शिवं श्रेयसो-
ऽनन्तनाथाऽवतारेऽभवत् सप्तमी७ ।
अष्टमी श्रीनमेर्जन्मने सेवधी ९
विश्रुतः कुन्थुनाथोऽथ पक्षेऽर्जुने ॥ २० ॥
नयने२सुव्रतच्युतिः शरे५
नेमेर्जन्म रसे६ऽस्य तु व्रतम् ।
भुजगं ८ वामेयनिर्वृती
राकायां समवातरन्मुनिः ॥ २१ ॥
इषाये नभस्ये तुरगे७ऽपवर्गश्चन्द्राभनेतुश्च्यवनं च शान्तेः ।
वसौ८सुपार्श्वावतरोऽथ शुद्धे निर्वा९शिवं श्रीसुविधेश नष्ठे ॥२२॥
दर्शे१५त्वाश्वयुजे शिवासुतमनी राका१५दिने श्रीनमे-
र्जन्म चाऽवतरो मयेति विनुताः कल्याणकैः श्रीजिनाः ।
कल्याणौघकराः मयोधमतुलं तत्वं त्वनन्तं स्फुर-
न्नित्यानन्दमयी यतो मम भवेद्युपञ्चयश्रीः परा ॥ २३ ॥
एवं सर्वजिनेश्वरांस्त्रिजगतीश्रेयोविलासप्रदान्
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमान् यः स्तुते ।
सर्वाभीष्टसुखौघपैरविरतं स्फूर्जत्समोदाऽद्वयो
मोदेऽपि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥२४॥
इति युगप्रधानावतारबृहत्तपागच्छाधिराजश्रीदेवसुन्दरसूरिश्रीज्ञानसागर-
सूरिश्रीसोमसुन्दरसूरिशिष्यैः श्रीमुनिसुन्दरसूरिभिर्विरचिते जयश्र्यङ्के
श्रीजिनस्तोत्ररत्नकोशे प्रथमप्रस्तावे चतुर्विंशतिश्रीजिन-
कल्याणकस्तोत्ररत्नमष्टादशम् ।

॥ अर्हम् ॥

जयश्रिया मोहरिपोरवाप्त-
त्रिलोकसाम्राज्यरमाभिरामम् ।
विदेहभूमण्डलमण्डनं श्री-
सीमन्धरं स्वामिनमानुवामि ॥ १ ॥

स्तुवन्ति यं दिव्यदृशः सुयोगिन-
स्तव स्तवं तं विदधे जडोऽप्यहम् ।
पिबेद् गजो वारिसरस्यजोऽपि वा
स्वतुन्दिपूरं समता फले पुनः ॥ २ ॥

भवन्ति ये सिद्धरसास्तव स्तवै-
रिवौषधैर्भावितभावतः प्रभो ! ।
तेषां सदा शीलितयोगसम्पदः
स्फुरन्ति कल्याणसमृद्धयः पराः ॥ ३ ॥

भवद्गुणाचित्तमिदं समन्ता-
त्पारिप्लवं मे विषयेषु लुभ्यत् ।
गुणैर्निबद्धं स्तवयोनिर्नस्ते
स्थिरीभवत्साम्यनशर्मणेऽस्तु ॥ ४ ॥

महेश ! देशान्तरितोऽपि पूना-
स्त्वयादिभक्तीमिम संभवीन्द्र ।
भवन्ति नाऽप्यान्तरितेऽपि भानौ
नृणां क्रियार्थाञ्जलयः कृतार्थाः ? ॥ ५ ॥

विजयं जिन ! पुष्कलावती-
विनुतः पूर्वविदेहभूषणम् ।
नगरीमपि पुण्डरीकिणीं
त्वमपूपुर्य जगत्त्रयःकल्पम् ॥ ६ ॥

श्रीकुन्थुनाथारजिनान्तरे त्वं
जातः श्रियाऽनन्य सुव्रतस्य ।
अत्रान्तरं शासपितुश्च राज्ये

जिनं गती भाव्युदयाद्दितोऽस्तु ॥ ७ ॥
तपांसि तान्येव तपांसि मन्ये
तानेव योगानपि तात ! योगान्
येषां महिम्ना नयनातिथित्वं
मनां जिनश्चिमतिभूः प्रयामि ॥ ८ ॥
श्लाघ्या ग्रहा भ्रान्तिजुषोऽपि तेऽमी
ये तात ! पश्यन्ति दिनान्तरे त्वाम् ।
गतभ्रयोऽपि त्वयि विश्वबन्धा-
वहं त्वथन्यस्तव दूरवर्ती ॥ ९ ॥
स्तवीमि सीमन्धर ! पक्षिणोऽपि
पश्यन्ति ये पक्षबलादिनं त्वाम् ।
अहं तु पापस्तव दर्शनार्थे-
मनोरथैरेव सदा कदर्थ्ये ॥ १० ॥
मनोरथा अप्यथवा भवन्तु
सदा भवद्दर्शनगोचरा मे ।
ध्यानेऽपि यत्पूजितवद्ददासि
त्वमीप्सितं सर्वमिति प्रमोदे ॥ ११ ॥
स्तवीमि कर्म्माणि मुनीन्द्र ! तानि
बभूव येभ्यो मनसः प्रसूतिः ।
ध्यानेन साक्षादिव येन कृत्वा
त्वां दैवतं स्यां भगवन् ! कृतार्थः ॥ १२ ॥
दूरेऽपि भक्त्या विमलेऽसि चित्ते
सद्कान्तिभाग् मे हर तत्तमोऽन्तः ।
किं दर्पणान्तः प्रतिबिम्बितोऽपि
रविः प्रकाशं न तनोति गेहे ? ॥१३॥
त्वं सर्वसर्वेष्टहितोपकारी
दूरेऽपि मां बोधय विश्वबन्धो ! ।

त्वमेव तान् सम्यगवग् न मत्प्रभो !
परं शिवस्यौपयिकं त्वदीरितात् ॥ १८ ॥
त्वदंह्रिसंस्पृष्टरजस्यपीश ! यः
स्फुरत्प्रभावः स सुरान्तरेषु न ।
उपान्तदारुण्यपि चन्दनस्य यत्
क सौरभं तत्फलदान्तरेषु वा ॥ १९ ॥
परे ददन्ते भवचारके जनि-
स्थिति-क्षयांश्चित्रमहान्ययेऽङ्गिनाम् ।
अचिन्त्यसौख्यं च महोदये भवा-
नतन्त्रयथैत्य इतो विशेष्यसे ॥ २० ॥
विवेचयन् यश्चरितैर्हरादिकान्
निजान् भवन्तं विजहच्च दूरतः ।
अलम्भयत्त्वामिति मादृशानपि
मशुं स मोहः किल बान्धवः परः ॥ २१ ॥
तव स्वरूपं सुगतो विचारयं-
स्तदन्यवस्तु क्षणिकत्वमेव यत् ।
त्वचां च तद्वस्तु ददर्श धीनिधि-
र्व्यष्टिपभेदाविति तत्त्वमास्थितः ॥ २२ ॥
विलोकते देव ! तवागमाञ्जना-
न्निसर्गचिद्दर्शनलोचनोपगम् ।
अनाद्यविद्यातिमिरं निरस्य यः
स एव किञ्चिचच रूपमीक्षते ॥ २३ ॥
समः प्रभोऽर्थः खलु देवतोऽपि ने
विचेतनो नो न परोऽपि मोहयुक् ।
सचेतनो मोहविवर्जितश्च यः
स तु त्वमेवेत्युपमा न गाहते ॥ २४ ॥
कथं स मेयो महिमा तव प्रभो !

करोति किं नो गगने स्थितोऽपि
सुधामयूखः कुमुदे प्रबोधम् ? ॥ १४ ॥
दुर्गाद्रिनद्यन्तरितोऽपि नेत-
रुल्लासयस्येव गुणैस्त्रिलोकीम् ।
किं काचकुम्भान्तरितोऽपि दीपः
प्रकाशयत्येव करैर्न वेश्म ? ॥ १५ ॥
अनाद्यविद्योदरपाशबद्धं
मां मोचय त्रातरिहापि सन्तम् ।
पयोजगर्भप्रतिपन्नरोधं
भृङ्गं यथा दूरतरोऽपि भानुः ॥ १६ ॥
जगन्ति पश्यन्नपि किं कषायै-
र्मां पीडितं पश्यसि न स्वभक्तम् ? ।
दृष्टस्त्वया यत्र हि पीड्यते तै-
रुरीकृतो वज्रिजितेव सर्पः ॥ १७ ॥
यथेच्छदानैरनृणीकृते त्वया
जगत्यशेषेऽपि ऋणार्दितोऽस्मि किम् ? ।
कर्म्मोत्तमर्णैर्भवगुप्तितो न य-
न्मुच्ये विनायापि ऋणाद्भवास्थितेः ॥ १८ ॥
सुयोगविद्याविधिसम्प्रयोगत-
स्त्वन्मामपि प्रापय तत्त्ववेशेनपीन् ।
येनानृणीभूय निरस्य रोधका-
ननन्तधामा विलसामि मुक्तिभाक् ॥ १९ ॥
त्वां यत्र चित्ते विनिवेश्य योद्दे
रागादयो देव ! दहन्त्यदोऽपि ।
ततो जगद्रक्षणदक्षिणोऽपि
कथं विभो ! रक्षसि नाश्रयं स्वम् ? ॥२०॥

त्वमेव नाम सम्यगताम् न मन्मथो ।
पदं निरस्यापि निकं त्वदीरितात् ॥ १८ ॥
त्वदंह्रिसंस्पृष्टरजःकणश्च । यः
स्फुरत्प्रभावः स सुरान्तरेषु न ।
उपात्तदारुण्यपि चन्दनस्य यत्
क सौरभं तत्कलशान्तरेषु वा ॥ १९ ॥
परे दधन्ते भवतारके जनि-
स्थिति-प्रणाशाभिनमहात्म्यतेऽङ्घ्रिणाम् ।
अचिन्त्यसौख्यं न महोदये भवा-
नतन्वयश्चेत्य इतो विशिष्यसे ॥ २० ॥
विवेचयन् यश्चरितैर्हरादिकान्
निजान् भवन्तं विजहाति दूरतः ।
अलब्धयत्स्वामिति मादृशानपि
प्रभुं स मोहः किल बान्धवः परः ॥ २१ ॥
तव स्वरूपं सुगतो विचारयं-
स्तदन्यवस्तु व्यसिद्धसिमेव यत् ।
त्वत्तां च तद्वस्तु ददर्श धीनिधि-
र्व्यावृत्त्यभेदाविति तत्त्वमास्थितः ॥ २२ ॥
विलोकते देव ! तवागमाञ्जना-
न्निसर्गविद्दर्शनलोचनोपगम् ।
अनाद्यविद्यातिमिरं निरस्य यः
स एव किञ्चित्तव रूपमीक्षते ॥ २३ ॥
समः प्रभोऽर्थः खलु देवतोऽपि ते
विचेतनो नो न परोऽपि मोहयुक् ।
सचेतनो मोहविवर्जितश्च यः
स तु त्वमेवेत्युपमां न गाहसे ॥ २४ ॥
कथं स मेयो महिमा तव प्रभो !

अथवा—

रागादयो यदि जिनास्त्वयैते
वैरेण तेनैव जिनेन्द्र ! मन्ये ।
करोषि चित्ते मम यत्र वासं
ददन्त्यमी तत्पुरुषेक्षणं किम् ? ॥ २१ ॥

विधूय रागादिभवान् विकारान्
दधासि रूपं निरुपाधिकं यत्
त्रिलोकपूज्ये भवतः प्रसादा-
न्ममापि तथानुभवोऽस्तु सम्यक् ॥ २२ ॥

अप्रेक्षणः सर्वविदोऽपि भगवान् सीमन्धर ! मामपश्यन् चिरं मे ।
किं विस्मृतोऽहं यदि दूरगतत्वाज्जनं न युक्तं भवति दूरदर्शी ॥ २३ ॥
इत्यादिकतोऽस्मीति कृपाद्रिं मां कुरुष्व सदयक् कृपया प्रसद्य ।
भवादपि मुक्तं मम सेवको यदेवात् स्वातन्त्र्यं च ममाप्रतोऽपि ॥ २४ ॥

श्रीसीमन्धर ! तीर्थनाथ ! भवता [illegible]
नाथाऽहं मुनिपुङ्गवोऽभवयथा कृपाः प्रसादं तथा ।
इत्थं सर्वज्ञ ! यथार्थतोऽपि विशुद्धज्ञानादिरत्नत्रया-
द्वृत्त्या कर्मप्रयविधं शिवपुरे [illegible] ॥ २५ ॥

इति गुणप्रधानावतारपूर्वक[illegible]
[illegible]
श्रीजिनस्तोत्ररत्नकोशे [illegible]
[illegible] ।

॥ अर्हम् ॥

आनन्दं [illegible] पदं [illegible] ।
[illegible] ॥ १ ॥
प्रभो ! [illegible] न दूरं [illegible] ।
[illegible] ॥ २ ॥

हातुं यदीशे न रसेषु लौल्यं न गन्धगर्द्धं न हि शब्दरागम् ।
वाञ्छं न च स्पर्शसुखे न रूपेऽप्युग्रत्कषायः सति ते श्रुतेऽपि ॥३
महाव्रतानां न हि मे विशुद्धिर्नास्मि प्रगल्भः समितीश्च धर्तुम् ।
गुप्तीस्तथा पालयितुं प्रमादध्यातुं च सद्ध्यानमसद्विकल्पैः ॥४॥
(युग्मम्)
भीतस्ततोऽर्हन् ! भवदुःखराशेरितश्च मुक्तेर्विमृशन्तु पातान् ।
स्तवेष्वसारेष्वपि ते यतेऽस्यापात्रायपात्राय कुतश्चिदेतम् ॥५॥
मां कद्वदं निर्गुणमप्यमुं तद्रक्ष प्रभो ! त्वं दययैव दीनम् ।
शक्यं न चेन्निर्गुणपालनं तद् गुणान् ददस्वेत्यपि ते हि वश्यम् ॥६
ज्ञानं न मेऽस्ति प्रचुरस्तु गर्वः क्रोधोऽस्ति भूयान् न तपश्च तीव्रम् ।
न सत्क्रियाऽऽस्ते बहुला तु माया वस्त्रादिलोभोऽस्ति न संयमस्तु७॥

सन्तीश ! शिष्या न च शुद्धशिष्या
आडम्बराः सन्ति न सुक्रियास्तु ।
वाग्डिण्डिमोऽस्ति प्रशमस्तु नान्तः
सत्पुस्तकाः सन्ति न चार्थबोधः ॥ ८ ॥
एवं समग्रा अपि सन्ति दोषा
गुणाः पुनर्नो मयि लेशतोऽपि ।
बिभेमि दोषप्रभवात् फलात्तु
लुभ्यामि तस्मिन् गुणसंभवे ॥ ९ ॥
उपायहीनं तदुपेयसक्तं
मां किञ्चिदौपायिकं प्रसाधि ।
यतो जिनपोऽपि गुणानवाप्य
लभेत तेषां फलमप्यभीष्टम् ॥ १० ॥
(अर्थतश्चतुर्भिः कलापकम्)

गर्वेण मे ज्ञानमपाक्रियेत ध्यानं च सर्पत्कुविकल्पजालैः ।
चारित्रलेशोऽपि न सत्कषायैः क्रियाकलापश्च सदा प्रमादैः ॥११॥
इत्यान्तरर्धं ह्रियते द्विषद्भिः प्रसद्य सर्वस्वमिदं मदोग्रैः ।

विहारकल्याणरूपश्चकादिभिः ?।
यतस्त्वदाज्ञाज्जुनोपकारितां
द्रव्यादयोऽर्था दधते परेऽप्यहो !॥ २५॥
ततोपि तत्सत्स्तु नाथ ! रज्जुषु
स्थितोऽपि चेज्जन्मनि नारकाङ्गिनाम्।
हृदि स्थितस्तत्क्षणिनां सुखाद्वयं
यदव्ययं त्वं ददसे किमद्भुतम् ?॥ २६॥
अवाप्य रागादिकसेवकान् परै-
र्वशीकृतं नाथ ! यथा त्रयं जगत्।
निरस्य चैताश्च तथा त्वया न तत्
स्वसेवकं मामवयन्तुमर्हसि॥ २७॥
ददासि चेत्त्वं स्वसमाधिवारिधे-
र्मेमैकतं बिन्दुमपीश ! तोषतः।
ततः स्मरात्था मम केऽरयः कुतो-
ऽथवा भयं किं सुलभं न शर्म वा ?॥ २८॥
तदर्थये त्वां मनुमुद्गितो भवा-
दवाप्य रागाद्यरिभिः कदर्थितः।
समाधियोगं मम देहि तं ध्रुवं
यतो विमुच्ये जिन ! भावशात्रवात्॥ २९॥
जिनवर ! भवतैव दर्शितोऽयं
निज इह कोऽपि स धर्मकल्पवृक्षः।
निरवधि लभते शुभानि यस्मात्
त्रिजगदपीष्टफलान्यनाद्यनन्तात्॥ ३०॥
बहुविधमभिवीक्ष्य सर्वदेवा-
स्तदुदितमत्रगुणाथ तर्कनेत्रैः।
शरणमगमकं सदैव पादा-
ब्जितपतत्त्वनिधिं च पाहि तन्माम्॥ ३१॥

विजेताऽस्ति न च त्वदन्यस्तवे पुरो नायको पूत्करोमि ॥१२॥
त्वत्तः सर्वपरमाल्पयोऽस्ति कृपालुरेकश्च कृपाऽऽस्पदेषु ।
प्रसिद्धिर्नियमी वर्तत सम्यक् नतो मां जिन ! त्वं च रक्ष ॥१३॥
त्वद्ध्यानकदर्थितं मे जगत्त्रयुष्ठानविधौ मनो न ।
गाय चाऽयं न मनो विना स्यात् मयाभयार्थं नदर्मा दत्त ! ये ॥१४
अस्त्यभव्यः त्रिभवभयभारी दुःखार्णवानन्तभवभ्रमो मे ! ।
दुर्विकल्पैर्हि मनोऽजनीदृशं यदहं हि वकुर्यात्रे ॥ १५ ॥
॥येव नाथं शरणं प्रपद्ये सदाऽप्यधीये भवदागमं च ।
रदापि मे नाथमथाथ मन्त्रास्तैपावाधिष्ठायकदैवताश्च ॥ १६ ॥
श्वेमि पापाज्जिन ! दुर्गतेश्च याचे च भवात भववासरत्नम् ।
दि च सद्ध्यानमदुर्विकल्पं मनःशुभाभ्यासनयन्त्रणं च ॥ १७ ॥
भावारिवर्गस्य विलयथापि मनो दुरन्तं न नियन्तुमीशे ॥
[illegible] दुर्गतौ पातयतीति रक्ष ॥ १८ ॥
त्वयि मम [illegible] ।
पदपङ्कि [illegible] ॥१९॥
सर्वगुणस्थानकमाहात्म्यादपि [illegible] यतःऽहम् ।
[illegible] कुविकल्पपाशनिबद्धा मां हि शिवगं च एव ॥२०॥

न रक्षणं स्याऽर्हसि पूतिकर्णी
यथा न शुष्ठी [illegible] ।
न चासिधाराः पूजयानये
नाऽर्हसि [illegible] हौ ॥ २१ ॥
कुरु कृपालो ! मयि पोत नायक
[illegible] मे [illegible] ।
[illegible]
[illegible] ॥२२॥
[illegible]
[illegible] शरणं भवपातः ।

तत्तथा कुरु यथा कुविकल्पा
न क्षिपन्ति रिपवो नरके माम् ॥ २३ ॥
वाङ्मनो-ऽङ्गजनितं मम पापं
द्रुग्यतोऽपि भवतः स्तवनाद्यैः ।
नाशमाशु लभतां शिवता ते
तेऽप्यलं यदिह नाथ ! तवैव ॥ २४ ॥
संवृतेन मनसा महर्षयो
येन निर्वृतिमनन्तशोऽप्यगुः ।
मां तदेव कुविकल्पभृद्भवा-
म्भोनिधौ क्षिपति हा करोमि किम् ? ॥२५॥
प्रभो ! निपीयापि तवागमामृता-
न्यवाप्य चारित्ररसायनान्यपि ।
सहे प्रमादादिगदैः कदर्थनां
श्रयामि तत्कं शरणं हतोऽस्मि हा ? ॥२६॥
दुर्ध्यानतो मे विरमेन्न चित्तं
बिभेमि पापाच्च रूमदाच्च ।
स्वयं रिपुः स्वस्य तदित्यनन्य-
गतिस्तवाग्रे विलपामि नाथ ! ॥२७॥
कृपाऽऽस्पदं मां तदुपेक्षसे किं
न हंसि मेऽद्यापि दुरापदं यत् ।
कृपा न किं त्वां त्वरयत्यधीशा-
ऽप्यासीहृशो मे किमुताऽकृपत्वम् ? ॥ २८ ॥
भवद्विषः पासि सुराऽसुरानपि
प्रभुस्ततस्त्वां शरणं श्रयन्ति ते ।
दीनं श्रितं पासि न मां नु तत्त्व-
मीक्ष्य तत्त्वं निरुद्धं करोमि किम् ? ॥ २९ ॥
अद्यापि किं देव मया कुकर्म्म

त्वद्भक्तं नो बाधितुं नेशतेऽपि ॥ ५ ॥
नताङ्घ्रिभक्तगाऽजितशास्त्रसार-
समृद्धिपुत्राङ्गनगाजगन्दृशः ।
द्विरत्नगः सज्जनधामगोत्रा
जिनेश ! पुण्यैः सुभगा नृणां स्युः ॥ ६ ॥
निरन्तराशेषमहत्तमाग-
मवःप्रतिष्ठानमुनीर्जिनानि ।
सुदीर्घमायुःसुभगत्वसार-
कला लभन्ते जिन ! तेऽङ्घ्रिभक्ताः ॥ ७ ॥
इहाप्यभीष्टानि सुखानि भुक्त्वा
युगादिजिनभवतोऽर्चनार्थैः ।
भव्या भजन्ते किल चक्रिशक्रा-
ऽहमिन्द्रदेवालयपञ्चमेलक्ष्मीः ॥ ८ ॥
रणे जयं सम्पदमाशु दुस्था
बद्धा द्रुतं बन्धनमोक्षमीश ! ।
नृपावरुद्धाश्च नृपात्प्रदानं
भक्ता लभन्ते ऋषभप्रभो ! ते ॥ ९ ॥
द्विधाऽस्मयंनाथ ! कदर्थितस्य मे
द्विधा च दोषैः सकलाखिलोलवैः ।
त्वमेव नेता जगतां पिता हिता-
ऽऽवहः शरण्यः शरणं भवाधुना ॥ १० ॥
नवप्रभावेषु सुरान्तरेष्वहो !
त्वमेव गर्जस्यतिशीतिभिः कलौ ।
ग्रीष्मे हि शुष्यन्ति जलाशयाः परे
प्रवर्द्धते वारिनिधिस्तु वारिभिः ॥ ११ ॥
जगत्त्रयीरक्षणदक्षिणे प्रभौ
त्वयि प्रपन्ने शरणं शरीरिणाम् ।

ममेदृशी धिग् यदनर्हताऽभूत् ? ।
जगत्त्रयेशोऽपि न पासि यन्मां
शोचामि हा ! हा ! हतकः स्वमेव ॥ ३० ॥
यद्यप्यदृष्टव्यमुखोऽस्मि पाप्मभिः
प्रसीद हे नाथ ! तथापि मय्यपि ।
त्वद्दर्शनं देहि विधेहि मेऽर्हतां
यतो भवेत्साऽपि तव प्रसादतः ॥ ३१ ॥
प्रार्थये शिवममुष्य कारणं संयमस्तु विषमस्त्वयोदितः ।
न प्रमाद्‌रिपवस्त्यजन्ति मां किं करोमि भवभीभृतस्ततः ?॥३२॥
सचेतनाऽचेतनवस्तुजातेष्वत्राप्तसाम्यास्तकृपाग्रपङ्कम् ।
मनः सदा मे गतदुर्विकल्पं भूयात्प्रभो ! त्वद्गुणवार्द्धिमग्नम् ॥३३॥
जगज्जनानन्दि हितोपकारानवद्यहृद्यापतिकत्प्रवृत्ति ।
भवद्गुणस्तोमकथैकवृत्ति वचोऽस्तु मे नाथ ! शिवानुवृत्ति ॥३४॥
निश्चाङ्गिपीडापरिवर्जनासप्रमादमुक् संयमयोगशुद्धिः ।
तव प्रसादान्मम सिद्ध्युपायस्तवशानतिव्यापृतिरस्तु कायः ॥३५॥
त्रातुस्त्वे निजदुःखसन्ततिमिति स्तोत्राज्जिनेन्द्राऽवदं
श्रक्कालीमुनिसुन्दरस्तवपदश्लोकयरक्षामभोः ।
कारुण्यामृतवारिधे ! यदि कृपापात्रे कृपां गाहसे
तद्दुःखप्रतिकारमाशु कुरु मां सर्वैः सुखैर्योजयन् ॥३६॥
इति युगप्रधानावतारबृहत्तपागच्छाधिराजश्रीदेवसुन्दरसूरिश्रीज्ञानसागर-
सूरिश्रीसोमसुन्दरसूरिशिष्यैः श्रीमुनिसुन्दरसूरिभिर्विरचिते
जयवत्प्रद्वे श्रीजिनस्तोत्ररत्नकोशे प्रथमप्रस्तावे
स्वसांसारिकदुःखप्रकटनदुरमतिकारवि-
ज्ञप्तिरूप स्तोत्ररत्न विंशम् ।

॥ अर्हम् ॥

जयश्रियां सेवधिमेधमानसप्रज्ञाङ्घ्रिपद्मदिनीनदीशम् ।

यथेह नश्यन्ति मिथो द्विषां त्रिधा
परत्र मार्गारिकदुःखजाम्नया ॥ १२
अयं जनः क्वापि कर्म्मभिः कृतैः
पराभिभूतो भवति पदे पदे ।
ततो विपक्षोऽप्ययमितावितिभिः प्रभो !
प्रमोदते त्वामधिगत्य तायिनम् ॥ १३ ॥
दुष्पारदुःखाद्भवगर्तपातिनो
देवान्तरायात्मकुशावलम्बिनः ।
अयं तवाज्ञापवियष्टिमाश्रितः
स्वपक्षरं श्रीपद एव मन्यते ॥ १४ ॥
विविधदुःखानलतापिताः परे
श्रयन्ति का नोपयिकेन तृष्णिकाः ।
अयं तु ते ध्यानसरोऽभिगत्य तान्
सर्वोहिताऽऽप्त्या मुदितोऽनुकम्पताम् ॥ १५ ॥
यथाऽसि देवान्तरदूरितानां
ज्ञानादिकानां शरणं गुणानाम् ।
समग्ररोगादिभयाकुलाना-
मपीश ! नाभेय ! तथा त्वमेव ॥ १६ ॥
देवान्तरापास्तनया गुणानां
ज्ञानादिकानां शरणं यथाऽर्हन् ।
समग्ररोगादिविपत्प्लुतानां
त्राता तथैवासि विभुस्त्वमेव ॥ १७ ॥
त्वयि प्रभो ! देलउलापुरेशे
यथाऽर्चिते द्राग् विपदः क्षयन्ति ।
नानाभवोपार्जितसम्भवानि
तथैव कर्माण्यपि नाभिसूनो ! ॥ १८ ॥
संवर्मितानां भवदाज्ञया यथा

सुरासुरेन्द्रालिविधीयमानक्रमाम्बुजोपासनभासमानम् ॥१॥
सहस्रपत्राद्भुतहेमपद्मे पद्मासनासीनमदीनमेधम् ।
जगत्त्रयैकप्रभुनाथभावप्रभाऽभिरामं मुनिराजिराजम् ॥ २ ॥
अनुत्तरब्रह्ममयं निरङ्कमृगाङ्कबिम्बोज्ज्वलकायकान्तिम् ।
श्रीवर्द्धमानादिमशिष्यनाथं श्रीगौतमस्वामिनमानुवामि ॥३॥

(विशेषकम्)

निदेशतो वीरजिनेश्वरस्य दशमप्रश्नोकमितं व्यधाद्यः ।
श्रीसूरिमन्त्रं त्रिजगद्धितैषी स गौतमो रातु ममेष्टसिद्धिम् ॥
सरस्वती विश्वहितावधाना सूरीश्वरध्यानपदप्रभावा ।
सहस्रहस्तप्रथिता त्रिलोकस्वामिन्यपि प्रार्थितशास्त्रदात्री ॥५॥
श्रीदेवता विश्वविमोहनी चासुरेन्द्रवर्गस्तवनीयरूपा ।
यक्षाधिपो विंशतिशस्त्रहस्तस्फुरज्जगज्जैत्रपराक्रमश्च ॥ ६ ॥
इन्द्राश्चतुःषष्टिरभीष्टदाश्च त्रिलोकरक्षाप्रभवत्प्रभावाः ।
यक्षाश्चतुर्विंशतिरार्हताद्रिसेवापवित्रीक्रियमाणगात्राः ॥ ७ ॥
देव्योऽपि दिव्याव्ययशक्तियुक्ता भक्ता जिनेष्वार्हतभद्रसक्ताः
उपासते यं गणधारिमन्त्राधिष्ठायका नित्यमचिन्त्यभक्त्या ॥
यस्यामममन्त्रोऽपि जयत्यचिन्त्यशक्तिर्महत्कुम्भ-मणि द्रुमादीन्
तं सर्वचिन्तानिगमप्रहेतुं श्रीगौतमं नौमि भवाब्धिसेतुम् ॥ ९
यद्वं यथाऽब्धिस्तटिनीतटीनां यं तारकाणां विधुः सतानाम्
तथा विभो ! गौतम ! सर्वलब्धिप्रभावाविश्वो भगवांस्त्वमेव ॥

मुक्तिं व्रजंस्त्वं न्यदधाः स्वनाम्नि
सश्रीसर्वालोथ ! निजानुलब्धीः ।
त्वमत्यदो यत्र नरे गणेन्द्र !
वसन्ति यत्ना अपि तत्र सर्वाः ॥ ११ ॥
श्रान्ताः चिराशां नत लब्धयस्ता
दुःखाद् भ्रमन्त्यः किल वीक्ष्यमाणाः ।
नापाविः मृणान्ति नरेश ! यत्र

जगद्विपो न प्रभवन्त्युपद्रवाः ।
तथा कषायादिभटोत्कटौजसः
शरीरिणां पापमहारयोऽपि च ॥ १९ ॥
किं कामकुम्भैर्मणिभिः सुराणां
मरुद्रुमीभिः सुमनोद्रुमैर्वा ।
हृदि स्थितिं देलउलावतंसः
सतां यदि श्रीऋषभो विधत्ते ॥ २० ॥
अनन्तचिद्दर्शनवीर्यशर्म्मणे
जगद्विपद्व्याहननैककर्म्मणे ।
युगादिदेवाय हताखिलार्त्तये
नमो नमो देलउलार्च्यमूर्त्तये ॥ २१ ॥
समग्रभक्तेहितशर्म्मदायिने
समग्रभीत्या जगदेकतायिने ।
स्थितिप्रदायांहिजुषोऽपुनर्भवे
नमोऽस्तु मे श्रीऋषभाय शम्भवे ॥ २२ ॥
वशीकृतिर्वाञ्छितसर्वसम्पदा-
मुदग्रमुच्चाटनमापदां ततः ।
प्रवासदात्री निखिलांहसा नुनं
ममास्तु भक्तिर्वृषभप्रभौ परा ॥ २३ ॥
तरीमिवाश्रित्य तरन्ति वारिधि-
भवाह्वयं ये नृसुरासुरादयः ।
भजेयमाज्ञामृषभप्रभोरिमां
भवन्तु पुण्यानि च मे तदाऽऽप्तये ॥ २४ ॥
बहुविधबहुकर्म्मजैः कृतर्कै-
र्निहविधियां कति नैव दैवतानि ।
निकषभिसमनाविचारिणां तु
त्वमसि विभो ! ऋषभैक एव देवः ॥ २५ ॥

मृत्कुण्ठ एवानुसरन्ति तं द्राग् ॥ १२ ॥
त्वयाऽऽतपस्यासमयात्कराब्जे
जड़े निलीना खलु केवलश्रीः ।
दीक्षाभिषायन्यदधा यदीय-
शिरस्सु तं ते द्रुतमापुरेताम् ॥ १३ ॥
त्वयाऽऽत्मनो वीरजिनाधिपेना-
ऽभेदस्तथाख्यायि वशेन भक्तेः ।
अनन्तविद्दर्शनवीर्यसौख्य-
लाभात्त्वदर्मैव विभो ! यथाऽभूः ॥ १४ ॥
शिवश्रियः कोऽपि दृढोऽनुराग-
स्त्वयीश ! सौभाग्यरमात्मकेऽहो ! ।
नामापि यस्ते जपतः मुदा-
ऽपाऽखिलान् मापयतेश ! शर्म ॥ १५ ॥
त्वदीयभक्तेः शिवशर्मलक्ष्म्या
मैत्री प्रभो ! कापि परा नवीना ।
स्वाधारकान् भव्यजनान् गुणाढ्यां-
स्तस्यै पतीन् सा हि ददात्यनयान् ॥ १६ ॥
न के पदार्था बहवो महान्त-
स्तव प्रभावे तु विचिन्त्यमाने ।
पृथ्वी न पृथ्वी न गिरिर्गरीयान्
नाब्धिर्महीयान्न नभोऽप्यदभ्रम् ॥ १७ ॥
विदन्ति मानं जलधेर्भुवो वा
केचित्कथंचिन्नभसोऽपि विज्ञाः ।
न ते प्रभावे पुनरस्ति मानं
भवन्त्यमाना अपि किं तदार्याः ! ॥ ॥ १८ ॥
प्रभारपदं वा कमलापदं वा
वदन्तु पद्मं तव पादयोस्तु ।

एवं देलउलापुरे सुविदितं श्रीमद्युगादिप्रभुं
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखौघवैरविरतिस्फूर्जत्प्रमोदाद्वयो
मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥२६॥

इति युगप्रधानावतारबृहत्तपागच्छाधिराजश्रीदेवसुन्दरसूरिश्रीज्ञान-
सागरसूरिश्रीसोमसुन्दरसूरिशिष्यैः श्रीमुनिसुन्दरसूरिभिर्विरचिते
जयश्र्यङ्के श्रीजिनस्तोत्ररत्नकोशे प्रथमप्रस्तावे देउलाविभू-
षणश्रीऋषभजिनस्तवनरत्नं त्रयोविंशम् ।
ग्रन्थसंख्या १०६३ ।

॥ अर्हम् ॥

श्रीगुणविजयगणिविरचित-
चतुर्विंशतिजिनभवस्तवः ।

नत्वाऽऽद्यौ विधिवद्गुरोः क्रमकजद्वन्द्वं गरीयः श्रियो-
गेहस्य प्रकटप्रभावकलितस्याधारमूर्तेर्मुदा ।
श्रीमन्नाभिनरेन्द्रनन्दनमुखस्याद्वादिनामादरा-
द्दिग्मात्रङ्गजगज्जिनाकरमितान् वक्ष्ये भवान् भक्तितः ॥१॥
पूर्वं यो धनसार्थराड् युगलिकः सौधर्मवृन्दारको
विद्याभूष महाबलो नरपतिः कल्पे द्वितीये मरुद् ।
भूपालो युगलीसुरः प्रथमके कल्पे भिषग् द्वादशे
देवश्चक्रधरः समग्रविबुधोत्तंसो वृषाङ्कः श्रिये ॥ २ ॥
जम्बूद्वीपविदेहवच्छविजयाभूभामिनीभूषणं
भूपश्रीविमलादिवाहन इति प्रौढप्रतिष्ठाऽऽस्पदम् ।
गीर्वाणो विजयाभिधानविपुलस्फूर्जद्विमानेऽभवत्

अनाप्य माहात्म्यरमां नु तस्य
निपतितेऽम्बूनि सदा तपस्वी ? ॥ १९ ॥
भो भोः ! श्रिये किं व्यवहारखेदै-
राराधितैः किं बहुमन्त्र-तन्त्रैः ।
किं दैवतोपासनकर्मभिश्च
श्रीगौतमं ध्यायत नाथमेकम् ? ॥ २० ॥
पुरा यथा गौतम ! तापसादिकान्
मिथ्यामनादुद्धरसि स्फुरत्कृपः ।
तपस्क्रिया-संयम-योगदुर्बलं
भवावटान्मामपि तद्वदुद्धर ॥ २१ ॥
भवाब्धिभेष्युत्कटदुःखराशे-
र्धर्तुं द्विधेशे न च योगशुद्धिम् ।
गतिर्न मेऽन्याऽस्ति ततः शिवेच्छो-
स्त्वमेव तद्देहि कृपां मयीश ! ॥ २२ ॥
भावद्विषो ये निहतास्त्वयेश !
ते व्यन्तरीभूय भवद्रुषेव ।
निरौजसं त्वत्कुलजं समीक्ष्य
मां पीडयन्तीति मुनीन्द्र ! रक्ष ॥ २३ ॥
गणिवर ! तव सद्‌गुणैकलीनं
भवतु मना मम गौतमाऽविरामम् ।
विजहतु तदिमे कषायमुख्या
रिपुनिकराश्च मयीति सुप्रसीद ॥ २४ ॥
एवं श्रीगणनाथ ! गौतमगुरो ! स्तुत्वा मयाऽभ्यर्थ्यसे
नाम्नाऽहं मुनिसुन्दरोऽभवमथो कुर्याः प्रसादं तथा ।
त्वां सर्वज्ञ ! यथार्थतोऽपि विशदज्ञानादिरत्नत्रया-

भूयात्सूरिविभूषणेऽजितजिनः सोऽयं सतामन्वहम् ॥३॥
विश्वेशो विपुलाङ्कतो वज्रनामायोऽन्तगो भुवि
प्रख्यातः प्रथितोदयः सुरवरो ग्रैवेयके सप्तमे ।
श्रीसेनाङ्गभवो भवोद्भवमहाकष्टौघविध्वंसको
जीयाज्जन्मजरादिदुःखरहितो भास्वद्यशा जङ्गिनाम् ॥४॥
रत्नं रत्नपुरेश उज्ज्वलतरधैर्यःश्रियामाश्रयो
विश्वत्राणविधानमानवनृपो वर्णोदयानो महान् ।
सर्वार्थेन्द्रजगो जगत्प्रतिगुरुः श्रीसंवरक्ष्मापतेः
सूनुः श्रीअभिनन्दनो मतिपतामानन्दतात् पावनम् ॥५॥
[illegible]
[illegible] ।
[illegible]
[illegible] श्रीपद्मानन्दनः ॥ ६ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] श्रीगुणवान् [illegible] ॥ ७ ॥
[illegible]
[illegible] ।
[illegible]
[illegible] ॥८॥
[illegible]
[illegible] ।
[illegible]
[illegible]
[illegible]
[illegible] ।

[illegible] सकलमपास्य [illegible] स्तवं त्वये [illegible] ॥२०॥

[illegible]
[illegible]
[illegible] श्रीजिनप्रभसूरिविरचितम् ।

॥ अर्हम् ॥

जयश्रिया मामनुलम्भयन्तं [illegible] सदयाः ।
[illegible] पार्श्वजिनं [illegible] ॥ १ ॥
तव स्तुतिं यां [illegible] न [illegible] पार्श्व ! ।
[illegible] ॥ २ ॥

महाप्रभावाद्भवतामिहापरा-
पराजितुमिष्टे [illegible] ?।
अहोऽपि सर्वं [illegible]
कृत्वा [illegible] ॥ ३ ॥

जनं गुणाढ्यानुगतं न मोचिता
अपि स्मर्यमाणोऽपि भवाब्धिपाताः ।
न मोचयसे त्वं स्वभवोऽन्यरागिणी-
स्ततो गतिः का ननु विश्रुतो भवान् ? ॥ ४ ॥

"त्वमेव तुष्टः अपि पातुमीश्वरो
पुरा भवाद् दुःखमपास्य संस्थिताः ।
न तुष्यसि त्वं स्वभवोऽन्यरागिणी-
स्ततो गतिः का ननु विश्रुतो भवान् ? ॥५॥"

॥ इति वा पाठः ॥

अरोषतोषोऽप्यथवा त्वमेव मां
कृतार्थयिष्यस्यत एव नूयसे ।
अरोषतोषा अपि नार्थितप्रदाः
किमर्थिनां स्युस्त्रिदशद्रुमादयः ? ॥६॥

गीर्वाणास्त्रिदिवेऽजनिष्ट दशमे निर्वाणधर्मस्पृहः
सुग्रीवक्षितिपात्मभूर्भवभिदे श्रीपुष्पदन्तो जिनः ॥ १० ॥
विद्युत्पर्वविवेदवर्जविभवाविश्वम्भराविश्रुतः
पद्मास्यः क्षितिपालपालितसुतः श्रीपद्मपृथ्वीपतिः ।
श्रीमत्प्राणतवासिनाकिनिकराभ्रद्धारचूडामणि-
र्देवोऽथ मलयाचलः प्रथयतात् सिद्धिं सुवर्णप्रभः ॥ ११ ॥
आसीन्न्यायपनुभानगर्वविपानिद्रांसिकृतातिविभ्रमो
नीतिज्ञो नलिनादिगुल्मनृपतिश्चञ्चन्मतिः सद्गतिः ।
आदाय व्रतमच्युतेऽच्युतधुतां मुख्यो गुरुः श्रेयसे
श्रीश्रेयांसजिनादिदेवचरणः स्वर्धेनुतुल्यः सताम् ॥१२॥
पद्माभक्रमपाणिरिन्दुवदनः पद्मोत्तरक्ष्मापतिः
पूर्वं विमलादिबोधसचिवः प्रोद्दामधामा स्फुटम् ।
कल्पे प्राणतनाम्नि चारुधिषणो देवाधिराजस्ततो
देयाद्वासवपूज्यपादकमलः श्रीवासुपूज्यः शिवम् ॥१३॥
भूभृत्पातुमहापुरीनरपतिः श्रीपद्मसेनाभिधो
निःशेषाऽवनिपालपालितयशाः सामन्तवन्द्यक्रमः ।
ज्ञात्वा दैत्यमवानरसमयुतो देवः सहस्रारके
श्यामायास्तनुजस्तनोतु नियतं सौख्यानि भव्याङ्गिनाम् १४॥
राजा पद्मरथः सुकीर्तिधिषणागीर्वाणभट्टारकः
संजातः सकलार्थसाधनपटुर्न्यावर्ण्यमुख्ये भवे ।
देवः प्राणतकल्पगः सुरवधूनेत्रत्रिभागातिथि-
र्दिश्याद्वः कुशलं मुकुलत्कुशलः श्रीमाननन्तोऽन्वहम् ॥१५॥
भूभर्ता भरताऽवनौ दृढरथः श्रीभद्दिलाधीश्वरो
दुर्नीतिस्थितिभिज्जयी च विजये स्वाहाऽजनः सुन्दरः ।
स्वादस्त्वाग्भवाब्धितारणविधौ सत्कर्णधारः प्रभु-
र्मेचेनोजलवालकाचलविलासी धर्मदन्तावलः ॥ १६ ॥
श्रीषेणाभिधभूपतिर्मिथुनिकः सौधर्मकल्पे मरुत्



   श्रियेन्दिरां चेति करे तुरुम्नीम् ॥ १३ ॥
जगत्प्रदीप ! प्रतिपक्षतां तव
   धिनः प्रयान्ते प्रतिपक्षतां धियाम् ।
अतीतसंसारपथो पदं वपं
   पदाम्बुजं मे दधतः स्वमानसे ॥ १४ ॥
"अतीतसंसारपथो च कर्म्मणा
   पदं पदौ मे दधतः स्वमानसे" ॥
॥ इति योगराट्पाठः ॥
यथैव देवद्रुमरत्नकुम्भाः
   कर्म्मा न सन्तीति वदन्ति मुग्धाः ।
तथैव मूर्त्ता खलु ते निर्मल्यु-
   स्तदा न कार्यं हि करोति सैव ? ॥ १५ ॥
मितंपचत्वं किमिदं तव प्रभो !
   ममाथवा काऽप्यतुलाऽस्त्यनर्हता ।
यदक्षरानन्तसुखाधिपां निधेः
   सतोऽस्त्रमप्यानतुषे न मेऽर्थिनः ॥ १६ ॥
मितंपचत्वं घटते न ते निधे
   तमर्थिनां यद्गिरस्याविभमम् ।
अनर्हता मे यदि तत्क्षिपस्व तां
   प्रसद्य सद्योऽत्र विभुस्त्वमेव हि ॥ १७ ॥
सपञ्चविंशे जिन ! योजने शते
   गदादिपीडा विनिहंसि योऽङ्गिनाम् ।
स हंसि किं हृदपि मे स्थितो न ताः
   कुकर्मभिर्येऽक्षिप तानि नाथ तत् ॥१८॥
त्वयैव धत्ते त्रिजगत् सनाथता-
   मनाथयं त्वामहमप्यतोऽर्चिभाम् ।
सुदुर्गदोषो द्विविधस्तथापि चे-

भूदेवो मरुभूतिकश्च करटी देवोऽष्टमे खेचरो
मर्त्यः सोऽणिपतिः सुरः समजनि श्रीसार्वभौमे महान् ।
अस्वप्नाग्निदिवे बभूव दशमे मोघत्वभावेश्वलः
श्रीपार्श्वो भुजगेन्द्रचर्चितपदः पुण्यानि पुष्णातु वः ॥२४॥
ग्रामस्वाम्यमरो मरीचिरमृताहारः परिव्राजकः
पोढा चायूऽनघुग् भवोऽतिबहुलः श्रीविश्वभूतिर्महत् ।
विष्णुर्नैरयिको हरिश्च नरके भ्रान्तिर्भवान्बहु-
चक्री नाकिवरोऽथ नन्दननृपः स्वर्गेऽवतार्यवलः ॥२५॥
इत्थं श्रीवृषभाङ्कचन्द्रजिनपश्रीशान्तिकूर्मध्वज-
श्रीकम्बुध्वजपार्श्ववीरविजयाजातप्रभूतार्हताम् ।
विश्वस्याम्बुनिभानुनन्दनिधिदिग्द्वीपाक्षधूमध्वजाः
ऽर्हमीतिमता भवन्तु भवतां मोक्षा भवाः सिद्धये ॥२६॥
वर्षे व्योमनगर्तुक्षमिते राजादनीवन्दिरे
नाभेयादिजिना इति स्तुतिपथं नीताश्चतुर्विंशतिः ।
प्राग्भारेण मुदो गुणादिविजये मोऽभ्यूनसद्भावतो
देयासुर्विविधश्रियः सुभगतापानन्दकन्दाम्बुदाः ॥२७॥

इति श्री२४जिनभव१३८स्तवः ।

॥ अर्हम् ॥

श्रीमहावीरजिनस्तवः ।

...गन्तिलामरालदन्तिपवनैः सिंहक्षमाभृद्वनैः

॥ १ ॥

कुलगुवासमहोदधिनन्दनीप्रमदसमर्दवनिविश्रुतैः ॥ २ ॥
श्यामाभेकरयाङ्गरजगकटैः कीरप्रवज्ञोज्ज्वल-

ततो हताशस्य ममास्तु कोऽवितः ॥१९॥
प्रभावबाब्धौ तव मे मनो झषं
निमग्नमप्याः ! कुविकल्पजालकैः ।
कदर्थयेत् पार्श्व ! विमोहधीवर-
स्तदस्मि दुःखी विमनास्ततोऽव माम् ॥ २० ॥
मया प्रपन्नोऽसि समग्रवाञ्छित-
प्रदस्त्वमेव प्रभुराप्तशेखरः ।
स्वसेवकं चेदुररीकरोषि मां
त्वमप्यवाप्नोमि तुलां तवैव तत् ॥ २१ ॥
त्वदंह्रिभक्तिं भगवन् दधज्जनः
श्रीपार्श्व ! दुःखैस्त्रिविधैर्विमुच्यते ।
इतीश ! शास्त्रश्रुतमानुभौतिकं
कुरुष्व मे चेद्यसे कृपालुताम् ॥ २२ ॥
अशुभायतिकर्मकारिणो
मतिमत्त्वं ह्यविगानमेति नो ।
भवभीतिकरान् परान् स्तुवं-
स्त्वदभक्तिः सदधीश ! किं सुधीः ? ॥ २३ ॥
ज्ञानमानधनदानऋद्धयः
कान्तिकीर्त्तिधृतिबुद्धिसिद्धयः ।
सम्भवन्ति भविनामिह स्तवात्
सर्ववस्तुषु तवैव वास्तवात् ॥२४॥
ततः स्तुतिं श्रीजगदीश ! पार्श्व !
व्यधामिमां मुग्धधियाऽपि तेऽर्हन् ! ।
समीहितं देवनयाऽपि मे द्राग्
कृपा कृपालो ! विदितेति हि स्यात् ॥ २५ ॥
एवं पार्श्वजिनस्य ये विदधते महादनाऽऽह्वे पुरे
श्रीमदादविहारभूषणमणेः सद्भक्तियुक्ताः स्तुतिम् ।

खेटेशोऽमिततेज इन्दुविमलः श्रीप्राणते निर्जरः ।
सीरी द्वादशकल्पदेवतपनिर्वज्रायुधश्चक्रभृद्
ग्रैवेये त्रिदशो नृपश्च विबुधः शान्त्यै स शान्तिर्जिनः ॥१७॥
सिंहो द्विस्तिकुम्भिकुम्भदलने सिंहावहः काश्यपी-
कान्तः कान्तगुणौघरत्नजलधिः सर्वार्थसिद्धौ सुरः ।
श्रीसूरक्षितिपालवंशतिलकः श्रेयोऽम्बुजाहर्मणिः
सद्येतः सदने विशल्यविरतं श्रीकुन्थुतीर्थाधिपः ॥ १८ ॥
लब्धश्लोकधनो नृपो धनपतिर्विद्विपदन्तिव्रजे
बिभ्राणः स्फुटपाटवं पटुगतिर्मातङ्गविद्वेषिणः ।
धर्माराधनतत्परः श्रुतिमतिः सर्वार्थसिद्धौ मरुद्
यो जातः शिवतातिरस्तु भविनः स्याद्वादिसौदर्शनः ॥१९॥
पण्मात्रेर्मुदितो महाबल इति क्षोणीरमामाधवः
क्षोणीशस्त्रिदशाधिराजसदृशः श्रीयुग् जयन्ते सुरः ।
कर्मौघद्रुमहस्तिमल्लकरणिः श्रीमल्लिरिष्टाप्तये
सेव्यः सज्जनचारुचित्तजलधौ स्पष्टं मृगाङ्कोपमः ॥ २० ॥
भूपालः शिवकेतुकः सुरवरः कल्पेऽथ सौधर्मके
च्युत्वाऽभूच्च कुबेरदत्त उदितस्तुर्ये सुपर्वाऽग्रणीः ।
पश्चाद्भूपतिवज्रकुण्डल इति श्रीब्रह्मकल्पे मरुद्
वर्माहक्षितिपः सुधाऽशनवरः श्रीसुव्रतः पातु वः ॥२१॥
कौशाम्बीललनाऽऽस्यमण्डनमलं कारुण्यपाथोनिधिः
सिद्धार्थक्षितिभुक् सुपर्वमुकुटः श्रीप्राणते प्रीतिभाक् ।
वप्राकुक्षिसरोमरालविलसल्लीलायितं योऽधर-
न्मूर्त्यै वो भगवाननङ्गरहितः श्रीतीर्थनाथो नमिः ॥ २२ ॥
जम्बूद्वीपगते पुरेऽचलपुरे श्रीपद्मनक्षोणिराट्
सौधर्मे त्रिदशोऽथ चित्रगतिकः खेटश्चतुर्थे मरुत् ।
भूनेता रणनिर्जरो नरवरः शङ्खश्च लेखस्ततः
प्रालेयाचलचन्द्रनिर्मलयशा नेमिर्मनोमोदकृत् ॥ २३ ॥

प्रातर्वै सुविपुलेऽम्बरमध्ये ज्ञानादिरत्नं वरं
ईर्ष्यादिपिशाचाभिधया शिवपुरं गच्छन्तीव प्राप्नुयुः ॥ २६ ॥

इति युगप्रधानदादाश्रीजिनदत्तसूरिसन्तानीयश्रीजिनचन्द्रसूरिशिष्यज्ञानगणि-
मुनिश्रीसोमसुन्दरसूरिशिष्य-श्रीजिनसुन्दरसूरिविरचितं प्रभातस्तोत्रं
श्रीजिनरत्नाकरकोशः प्रभातवेलाया [illegible] नवपदादिन
जिनस्तोत्राणां वन्दनम् द्वात्रिंशत् ।

॥ अर्हम् ॥

जयश्रिया ईश्वरिपुञ्जराणां
जगत्त्रयमपत्यमुपाचनापम् ।
श्रीमद्युगादीश्वरजिनेन्द्रचन्द्र
स्तवीम्यहं देवकुलापुरस्थम् ॥ १ ॥
त्वयि प्रभो चेतसि संस्थिते स्यु-
र्न रोगशोका दुरुपद्रवाश्च ।
नो भीतयो व्याधय आधयो वा
तनूमतां दुःखकृतः कदाचित् ॥ २ ॥
विविधदुष्टज्वरकुष्ठकास-
श्वासाक्षिशीर्षोदरकर्णरोगाः ।
भगन्दराद्याश्च गदाः समग्रा-
स्त्वन्नाममन्त्रात् प्रलयं प्रयान्ति ॥ ३ ॥
ग्रहाः प्रशान्तिं दधते समग्राः
गुरुश्च शुक्रश्च शनैश्चराः स्युः ।
यक्षा नृपाद्याः महताः स्वलाश्च
श्रीमद्युगादीश ! तवांघ्रिभक्त्या ॥ ४ ॥
भूतप्रेतव्यन्तरक्षेत्रपालाः
सीकोतर्यः शाकिनी डाकिनी वा ।
व्यन्तर्याद्या अप्यधीन क्षमन्ते

भूदेवो मरुभूतिरथ करटी देवोऽष्टमे खेचरो
　मर्त्यः सोऽणिपतिः सुरः समजनि श्रीसार्वभौमे महान् ।
अस्वप्नास्त्रिदिवे बभूव दशमे मोघत्वभावेश्वलः
　श्रीपार्श्वो भुजगेन्द्रचर्चितपदः पुण्यानि पुष्णातु वः ॥२४॥
ग्रामस्वाम्यपरो मरीचिरसृनाहारः परिव्राजकः
　पोद्रा चामृडस्त्रभुग् भवोऽतिबहुलः श्रीविश्वभूतिर्भवत् ।
विष्णुर्नरयिको हरिथ नरके भ्रान्तिर्भवान्तर्बहु-
　श्चक्री नाकिवरोऽथ नन्दननृपः स्वर्गेऽवतार्षमलः ॥२५॥
इत्थं श्रीवृषभादिचन्द्रजिनपर्श्वाशान्तिकूर्पध्वज-
　श्रीकम्बुध्वजपार्श्ववीरविजयाजातमभूत्त्वर्हनाम् ।
विश्वक्ष्मामुनिभानुनन्दनिधिदिग्द्वीपाक्षभूमध्वजाः
　मीऽष्टमीतिमता भवन्तु भवतां मोक्षा भवाः सिद्धये ॥२६॥
वर्षे व्योमगजाङ्गमर्तुकमिते राजादनीबन्दिरे
　नाभेयादिजिना इति स्तुतिपथं नीताश्चतुर्विंशतिः ।
प्राग्भारेण मुदा गुणादिविजये मोऽद्भुतसद्भावतो
　देयासुर्विविधश्रियः सुभगतामानन्दकन्दाम्बुदाः ॥२७॥

इति श्री२४जिनभव१३८स्तवः ।

॥ अर्हम् ॥

श्रीमहावीरजिनस्तवः ।

चन्द्रादित्यमरालदन्तिपवनैः सिंहक्षमाभृद्वनैः
　वीणाकम्बुरमासमुद्रवरसाकर्पूरस्वर्णोदकैः ।
लक्ष्मीकान्तकुठारखड्गकुमुदैर्दीपापगाकार्मुकै-
　र्निर्ग्रन्थालिपयोरुहागुरुपिकैर्वैरूपश्चकाचैस्वरैः ॥ १ ॥
रमणविभ्रमलोचनकज्जलैर्वदनचित्रभुजङ्गमचन्दनैः ।
कुलसुवासमहोदधिनन्दनीममदसमर्दवनिविधुवैः ॥ २ ॥
　श्यामाभेकरथाङ्करवगरुदैः कीरप्लवङ्गोज्ज्वल-

मेरुस्थैर्यधैर्यभूरैः गुरुतरदाक्ष्माविकाशजनैः ।
नेमीरात्नकृपा[illegible]सद्वस्फुरद्दाने-
र्योर्तीर्थविधुं नमोस्म ६० [illegible] सारदुनैः संस्तुवे ॥३॥

भविकजनुदयोपनमानदं कोविदकोकनयनसारदम् ।
सुकृतयोरवसरमारदं दुष्कृतभूजनसारदम् ॥ ४ ॥
कनकवर्णोदयनोर्मो सारदं [illegible]कारिहारणसारदम् ।
जिनवचनानिर्मितमारदं कुमतिजनवर्जनसारदम् ॥ ५ ॥
सुरनरपार्थितमारदं वाक्ष्मनिर्जनपासारदम् ।
सु-रकवार्तितमारदं मतिमदनगुणपासारदम् ॥ ६ ॥
[illegible]मारदं [illegible] सारदम् ।
[illegible]मारदं [illegible]सारदम् ॥ ७ ॥
[illegible] मारदं [illegible]सारदम् ।
[illegible]मारदं [illegible]सारदम् ॥ ८ ॥
[illegible]मारदं [illegible]सारदम् ।
[illegible]मारदं [illegible]सारदम् ॥ ९ ॥
[illegible]मारदं [illegible]सारदम् ।
[illegible]मारदं [illegible]सारदम् ॥ १० ॥
[illegible]
[illegible] ॥ ११ ॥
[illegible]
[illegible] ॥ १२ ॥
[illegible]
[illegible] ॥ १३ ॥
[illegible]
[illegible]
[illegible]

स्त्रीगणवशीकृतमदनसारङ्गं लेश्यागुणलाञ्छितसारङ्गम् ।
दानावर्जितभविसारङ्गं निगदितनियतनिपुणसारङ्गम् ॥१६॥
केलिकृते रक्षितसारङ्गं जनरञ्जनलोचनसारङ्गम् ।
लुञ्चितभुजगसरत्नसारङ्गं धर्मकथाल्लापितसारङ्गम् ॥ १७ ॥
अङ्गरजोमृगमदसारङ्गं मोहरजोनिर्वापनसारङ्गम् ।
स्वरमाधुर्यमथितसारङ्गं वीरं भजत शुक्लसारङ्गम् ॥ १८ ॥
इत्थं वीरजिनः स्तुतो नवनवैः सारङ्गशब्दोद्भवैः
सद्भावैः सनयं गुणादिविजयेनानन्दरामोद्भवम् ।
हर्षोत्कर्षवशेन पेशलतरैर्भावैः सुरैः संनत-
श्चित्तमौलिकरं परं पदमयं दद्यान्मुदा देहिनाम् ॥१९॥

इति श्रीमहावीरजिनस्तवः ।

॥ अर्हम् ॥

श्रीद्वीपवन्दिरनवमजिनस्तवनम् ।

नवमथमणपवरममव्रजपरमशमक्षममकलवदनकज ! ।
गतमलमपदमसमजनगतमन ! भज नरभवभयहरणमचलधन ! ।१।
स्वस्त्रक्षय ! मदमदनशमरकर ! कमलदलमभनयनयमलधर ! ।
चरणकरणकलवरतरसदन ! भव मकरध्वजवरपददन ! ॥२॥
मकरध्वजतवपदयममघहरमसथय ! हस्तद्वयमजकर ! ।
अक्षरपदमद ! हतमद ! गतभव ! नवलसमकलमवरस्तव ! ॥३॥
मतमतमकरध्वजसरलच्छल ! गजशरवक्त्रक्षतमनभवदल ! ।
घनकश्मलजलधरश्वसन ! मम भवभयभहर ! जनवत्सल ! घनरव !॥४॥
"ममभदमय सबलकलघनरव !" ॥ पाठान्तरम् ॥
अमरक्रमणपशमवनजलधर ! रजतमद ! बलवचरमहधर ! ।
त्यक्तकलत्रतनयधनभवन ! रचय शमव्यय ! मन्मथमथन ! ॥५॥
गतभवकपट ! मदनजलधरजल ! पवनममघमपहर मम घनबल ! ।
अकलजनन-मरणक्षय ! मदगदपवग ! हलधरसहजचटनपद ! ॥७॥

सचरणद्वयजलचरमकर ! मयददलक्षणसत्वरहतदर ! ।
भव्यशरण ! रक्षक ! रतदमन ! जय जय मनरममदगलगमन ! ॥७॥
इत्थं गुणेनाऽतिमुदा बुधानामेकस्वराश्चित्रकरस्तवोऽयम् ।
श्रीपुष्पदन्ताख्यजिनेश्वरस्य दृब्धो भवत्त्वङ्गभृतां शिवाय ॥८॥
इति श्रीद्वीपबन्दिरनवमजिनस्तवनम् ।

॥ अर्हम्
श्रीयशोविजयबनारसजैनपाठशालोत्पादक-
शास्त्रविशारदजैनाचार्यश्रीमद्विजयधर्मसूरिविरचितं-

प्रथमं श्रीपार्श्वनाथाष्टकम् ।

विभोऽङ्गिनां सौख्यततिं मतिं गतिं
शुभां प्रशस्तां सुमनोहरां त्वरम् ।
तनोषि भो ! लासि ददासि सर्वदा
मयाऽपराधस्तव कीदृशः कृतः ? ॥ १ ॥
प्रभो ! मया भावविमुक्तशालिना
कृतं न कार्यं शुभभावसंयुतम् ।
समस्तसाध्वादिसुसाध्यसाध्यके
भवे भवेयं सुखभाक् कदाऽपि न ॥ २ ॥
कृपा कृपानाथ ! सदा विलोक्यते
कृतापराधेन जनेन नित्यशः ।
कृपाकृपाणः खलु यस्य सद्वतः
कृत हि तेनांहमनाशनं मुदा ॥ ३ ॥
दयां दयाधीश ! विधाय सत्वरं
भवोदधेस्तारय मां हि सागसम् ।
महाऽपराधेषु नतौ सुवत्सला
भवन्ति तत्त्वेषु सुतत्त्वदर्शिनः ॥ ४ ॥

प्रभोस्तव ध्यानपरम्परा वरा
कृताऽपराधैः शुभभावभावितैः ।
उपासना पापविनाशकारिणी
प्रसिद्धसिद्धान्तजलौकसारिणी ॥ ५ ॥
अनाथकं नाथ ! तथा प्रमाथनां
प्रयान्ति कामाघरयो दरिद्रताम् ।
मयूरयुक्ते गहने वनेऽप्यहो !
न नागकानां भ्रमणं विभाव्यते ॥ ६ ॥
अहो ! अहो ! मोहविचेष्टितं महन्मयास्ति गाढं भगवन् ! हि दुर्मदम्।
विद्यते सर्वगुकर्मसञ्चितं स्वसेवकं रक्ष सुपार्श्वपार्श्वक ! ॥ ७ ॥
अपारसंसारसमुद्रयानके जिने सदा भक्तिरतिं तनोतु भोः ! ।
सुबुद्धिधर्मैः शुभभावनाभवः करोतु कल्याणपरम्परां शुभाम् ॥८॥
इति श्रीपार्श्वनाथाष्टकं प्रथमम् ।

॥ अर्हम् ॥

द्वितीयं श्रीशङ्खेश्वरपार्श्वनाथाष्टकम् ।

श्रेयःपतिं श्रीनरदेवपारगं
सदा सदाचारविचारपारगम् ।
भक्त्या जनानां सुखदानतत्परं
नमामि शङ्खेश्वरधामसंस्थितम् ॥ १ ॥
कृतोपसर्गं कमठेन कर्मठं
तथापि निश्चिन्तनिबाधमानसम् ।
विधूतदुःखं शमतासरोवरं
नमामि शङ्खेश्वरधामसंस्थितम् ॥ २ ॥
भवाटवीं पर्यटता मया नुतं
भवाब्धिपोतं सुविशाललोचनम् ।
सदा प्रसन्नं सुखशान्तिकारकं

नमामि शङ्खेश्वरधामसंस्थितम् ॥ ३ ॥
अगाधसिद्धान्तपयोधिशेवधि-
मनाथनाथं सततं सुबोधिदम् ।
कृतापराधेषु जनेषु शान्तिदं
नमामि शङ्खेश्वरधामसंस्थितम् ॥ ४ ॥
कषायवर्गे निरुपायचित्तकं
सुसाधुसङ्घे विकथादिवारकम् ।
अज्ञानमूढे सुकृतादिदेशकं
नमामि शङ्खेश्वरधामसंस्थितम् ॥ ५ ॥
कषायदावानलदाहनीरदं
कुसङ्गसङ्गादिविषादिमन्त्रदम् ।
अनादिसंसारविकारजापदं
नमामि शङ्खेश्वरधामसंस्थितम् ॥ ६ ॥
सदागमादेर्नितरां प्ररूपकं
कुवासनादेः प्रबलं विडम्बकम् ।
अनेकविघ्नालिविपत्तिनाशकं
नमामि शङ्खेश्वरधामसंस्थितम् ॥ ७ ॥
यस्य प्रसादेन जगज्जनाना-
मनादिजन्यं क्षयमेति पापम् ।
तं देववन्द्यं सुरराजसेव्यं
नमामि भक्त्या प्रभुपार्श्वदेवम् ॥ ८ ॥

इति श्रीयशोविजयजैनपाठशालोत्पादकशान्तिसागरा-
ऽनगारगणाग्रणीश्रीमद्विजयधर्मसूरिविरचितं द्वितीयं
श्रीशङ्खेश्वरपार्श्वनाथाष्टकम् ।

इति जैनस्तोत्रसंग्रहस्य
द्वितीयो भागः ।